~~प्र. ५~~ ~~अग्निकवच~~

26 - कन्यारष्टमि संकल्प.

पत्र. 3. लि०

~~1330~~

1330

10" X 4" / 50"

श्रीगणेशायनमः अद्येहेत्यादि०ॐ नमः परमात्मने श्रीपुराणपुरुषोत्तमायाद्यब्रह्मणो द्वितीय
प्रहरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वंतरेऽष्टाविंशतिमे कलियुगे कलेश्च प्रथमचरणे ज
म्बूद्वीपे भरतखण्डे ऽऽर्यावर्त्तैकदेशे पुण्यक्षेत्रे अमुकाख्य संवत्सरेऽमुकायनेऽमुक गौवमु
कमास्यमुकपक्षेऽमुकतिथावमुकवासरेऽमुकनक्षत्रेऽमुकयोगेऽमुककरणे अमुकल
ग्ने अमुकांशेऽमुकराशिस्थिते भास्करेऽमुकराशिस्थिते चंद्रेऽमुकराशिस्थिते भौमेऽमु
कराशिस्थिते बुधेऽमुकराशिस्थिते गुरावमुकराशिस्थिते भृगावमुकराशिस्थिते श
नावमुकराशिस्थिते राहावमुकराशिस्थिते केतावेवं गुणविशिष्टायां तिथौ श्रुतिस्मृ
तिपुराणोक्त शुभफलप्राप्तिकामः अमुकगोत्रः अमुकप्रवरः अमुकशर्म्मा सप
त्नीकः सपुत्रः मम समस्त पापक्षयपूर्वक समस्त पितृणां निरतिशयानंद ब्रह्मलोका
वाप्त्यादि कन्यादानकल्पोक्तफलावाप्तये अनेन वरेणास्यां कन्यायामुत्पत्स्यमानसं
तत्या द्वादशावरान् द्वादशपरान् पुरुषान् पवित्रीकर्त्तुमात्मनश्च पवित्रीकर्त्तुं श्रीनाराय

कं० सं० णप्रीतये ब्राह्मविवाहविधिना कन्यादानमहं करिष्ये इति सङ्कल्प्य कन्यां कनकसम्पन्नां
१ कनकाभरणैर्युतां दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया १ विश्वंभराः सर्वभू
ताः साक्षिण्यः सर्वदेवताः इमां कन्यां प्रदास्यामि पितॄणां तारणाय च २ इति पठित्वा
गणेशगौरीवरुणान् संपूज्य वरस्य पादौ प्रक्षाल्य वराय नमः इति वरं संपूज्य कन्याया
ः पादौ प्रक्षाल्य कन्यायै नमः इति कन्यां संपूज्य शिष्टाचारात् कृतपीतहस्तां कन्यां दद्या
त् अद्येत्यादि० सर्वं पठित्वा अमुकगोत्रः अमुकशर्म्मा सपत्नीकः सपुत्रः मम सम
स्तपापक्षयपूर्वकसमस्तपितॄणां निरतिशयानंदब्रह्मलोकावाप्त्यादिकन्यादानकल्पो
क्तफलावाप्तये अनेन वरेण अस्यां कन्यायामुत्पत्स्यमानसंतत्या द्वादशावरान् द्वादश
परान् पुरुषान् पवित्रीकर्त्तुमात्मनश्च पवित्रीकर्त्तुं श्रीनारायणप्रीतये अमुकगोत्रस्या
मुकप्रवरस्यामुकशर्म्मणः प्रपौत्र्याममुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः पौत्र्या रा०म०
याममुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः पुत्र्याममुकगोत्रायाममुकप्रवरायाममुकश १

अ॰
१

मरीच्यत्रिः पुलहस्त्य पुलस्त्यः क्रतुरंगिराः ९ भृगुस्सनत्कुमारश्चसनकश्चसनंदनः
सनातनश्चदक्षश्चजैगीषव्योमनंदनः १० एकतश्चाद्वितश्चैवत्रितोजावालिकश्य
पो दुर्वासादुर्विनीतश्चकण्वाकात्यायनस्तथा ११ मार्कंडेयोदीर्घतनयःशुनः
शेपोविदूरथः ऊर्द्ध्वःसंवर्त्तकश्चैवच्यवनोत्रिःपराशरः १२ द्वैपायनोश्चचक्री
तोदेवराजःसहानुजः पर्वतास्तरवःकल्पःपुराणान्यायतनानिच १३ प्रजाप
तिर्दितिश्चैवगावोविश्वस्यमातरः वाहनानिचदिव्यानिसर्वलोकाश्चराचराः
१४ अग्नयःपितरोदेवाजीमूताश्चदिशोदश एतेचान्येचवहवःपुराणसंकी
र्त्तिताःशुभाः १५ एतेत्वामभिषिञ्चन्तुसर्वान्यान्निवर्हणे अथान्यान्यपि॰

गणाधिपोभानुशशीधरासुतोबुधोगुरुर्भार्गवसूर्यनन्दनः राहुश्चकेतुःप्र
मुखानवग्रहाःकुर्वंतुवःपूर्णमनोरथंसदा १ उपेन्द्रइन्द्रोवरुणोहुताशनः
धर्मोयमोवायुहरश्चनुर्भुजः गंधर्वयक्षोरगसिद्धचारणाःकुर्वन्तुवःपूर्णमनोर

राम॰
२

श्रीगणेशायनमः अथपौराणोक्ताऽभिषेकमंत्राः सुरास्त्वामभिषिंचंतुयेचसिद्धाः
पुरातनाः ब्रह्माविष्णुश्चरुद्रश्चसाध्याश्चसमरुद्गणाः १ आदित्यावसवोरुद्राअश्वि
नौचाभिषग्वरौ अदितिर्देवमाताचचंद्रसिद्धिःसरस्वती २ कीर्त्तिर्लक्ष्मीर्धृतिः
श्रीश्चसिनीवालीकुहूस्तथा दिनुश्चशरमाचैवविनताकद्रुरेवच ३ देवपत्न्यस्तु
याप्रोक्तादेवमीतरमेवच देवास्त्वामभिषिंचंतुदिव्याश्चाप्सरसांगणाः ४ न
क्षत्राणिमुहूर्त्ताश्चपक्षाहोरात्रसंधयः संवत्सरदिनेशाश्चकलाकाष्ठाक्षणा
लवाः ५ सर्वास्त्वामभिषिंचंतुकालस्यावयवाःशुभाः एतेचान्येचमुनयोदेवव्रत
परायणाः ६ सशिष्यामभिषिंचंतुसदाताश्चतपोधनाः वैनायकसुरगणा
मरणायःसगणैःसह ७ सरितश्चमहाभागा नागाःकिंपुरुषस्तथा वैखाने
सामहाभागद्विजावैहायनाश्चये ८ सप्तर्षयःसदापत्नि ध्रुवस्थानानियानिच

[illegible] भा. [illegible] दि [illegible] सुनेमुदा ३ [illegible]
[illegible] जीवपुरु [illegible] : नुष्ठिः [illegible] भा [illegible] ४
[illegible] ता देवदानवगन्धर्वा यक्षरक्षास [illegible] ५
[illegible] साक्षाद्धर [illegible] ५
[illegible] यानि चराणि [illegible]
[illegible] ७ [illegible] ८ [illegible]
[illegible] ८ [illegible] मानैः [illegible]
[illegible] धरः [illegible] तथा धेनुः [illegible]
[illegible] मानं [illegible] मानं १ [illegible]
[illegible] यादिति ॥

श्र·
२

थंसदा २ नलोदशरथःसगरोपुरूरवासकुंतलेयोभरतोजनार्दनः एमत्रयंवेणु
वलीयुधिष्ठिरः कुर्वंतुवः पूर्णमनोरथंसदा ३ तुंगप्रभासंचगृहश्चपुष्करंगया
विभातिवदरीवटेश्वरौ केदारपंपासरनैमिषारणीवंकुर्वंतुवः पूर्णमनोरथं
सदा ४ गंगाभिरामयमुनासरस्वतीगोदावरीवेत्रवतीचनर्मदा साचंद्र
भागावरूणाचगोमतीकुर्वंतुवः पूर्णमनोरथंसदा ५ सेतुचतुर्वः सितपत्र
चामरंमणिप्रदीपोवकुरत्नकांचनम सुवर्णकुंदश्चकृतोकृताशनः कुर्वंतु
वः पूर्णमनोरथंसदा ६ प्रयाणकालेयदिवासुमंगलेप्रभातकालेचनृपा
भिषेचने धर्मार्थकामस्यमुनिप्रभाषितंकुर्वंतुवः पूर्णमनोरथंसदा ७
इतिसर्वतीर्थाभिषेकोस्तु इतिपौराणोक्ताभिषेकमंत्राः चैत्रसुदि १० सं. १८८६
अन्यान्यपि सुरश्रेष्ठामभिषिंचंतुब्रह्माविष्णुमहेश्वराः वासुदेवोजगन्नाथः तथासंकर्षणोविभुः रम·
१ प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते आखण्डलोग्निर्भगवान् यमोवैनिऋतिस्तथा २ वरु २

कं०सं० र्म्मणे वराय श्रीधररूपिणेऽमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः अमुंकगोत्रोत्पन्ना
२ ममुकप्रवरां प्रपौत्रीममुकगोत्रस्यामुकप्रवरस्याममुकशर्म्मणः पौत्रीममुकगोत्रस्या
मुकप्रवरस्यामुकशर्म्मणः पुत्रीममुकनाम्नीमिमां कन्यां श्रीधररूपिणे धर्म्मार्थकाम
साधनभूतां प्रजापतिरूपिणे वराय भार्यात्वेन तुभ्यमहं संप्रददे इति निःपठित्वा॥ काम
स्तुतिम्पठ[illegible]त्वा महस्ते सद्व्याभूमिस्पृशेत् इति कन्यादानं कृत्वा. सांगतासुयेत्तदाह
पूर्वोक्तगुणविशिष्टायांतियो कन्यादानप्रतिष्ठार्थं सुवर्णदक्षिणां यथाशक्त्योपरिमि
तां वराय तुभ्यमहं संप्रददे तेन श्रीयज्ञरूपो नारायणः प्रीयताम् इति कन्यादानसंकल्पः
कन्यां हस्तं वरहस्ते दद्यात् वरस्तु देवस्य त्वेति प्रतिगृह्य स्वस्तीत्युक्त्वा स्वसारवीयां त्रुटि:४

राम:
२

वरुणाग्निंवायुंसूर्य्यमग्नीचवरुणावग्नीवरुणावश्विनौवरुणंसवितारंविष्णुंविश्वान्देवान्मरुतःस्वर्कान्वरु
णंप्रजापतिमाज्येनाहंयक्ष्ये ब्रह्माणमुपवेश्य ततस्ताम्रोद्दपात्रस्थापनम् जलपूर्णंप्रणी
तोन्नयनंतः ततःप्रणीताप्रणयनमाज्यभागानंतरंकलशप्रतिष्ठा आज्येनपंचाहुतिहो
मः तद्यथा अग्नयइत्यादीनांपंचानांपरमेष्ठीऋषिरग्निर्देवताउष्णिक्छंदोहोमेवि० ॐअग्ने
प्रायश्चित्तेत्वन्देवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यपतिघ्नीतनू
स्तामस्यनाशयस्वाहा इदमग्नये ॐवायोप्रायश्चित्तेत्वन्देवानांप्रायश्चित्तिरसिब्राह्मणस्त्वा
नाथकामउपधावामियास्यप्रजाघ्नीतनूस्तामस्यनाशयस्वाहा इदंवायवे ॐसूर्य्यप्राय